स्थितवपुर्युग्मपत्रं सुशुभ्रम्। तन्मध्ये हाकिनी सा शशिसमधवला वक्त्रषट्कं दधाना विद्यामुद्रां कपालं डमरुजपवटीं बिभ्रती शुद्धचित्ता। एतत्पद्मान्तराले निवसति च मनः सूक्ष्मरूपं प्रसिद्धम्” एतदभिप्रायेणैव “मनोऽपि भ्रूमध्ये निवसत्यानन्दलहर्य्यामुक्तम्। मनसस्तत्र स्थित्या च तदुपहितजीवस्यापि तत्रैव स्थितिः। एवञ्च श्रुतौ हार्द्दविद्यायां “हृद्ययं तस्माद्धृदयम्” इत्युक्तिस्तु हृदये ध्यानार्थादित्यविरोधः। महानिर्वाणतन्त्रे शरीर एव चतुर्द्दश भुवनानि सूक्ष्मरूपेण स्थितानि तानि च तत्रैव ध्येयानीत्युक्तं तत्र कुत्र किं ध्येयमित्याकाङ्क्षायां मूलाधारादिकं भूरादिलोकतया ध्येयमित्युक्तम् तत्र विशुद्धचक्रस्य जनोलोकतया ध्येयतामुक्त्वाह।

“एतत्पद्मस्योर्द्ध्वदेशे ज्ञानपद्मं सुदुर्लभम्। दलद्वयसमायुक्तं पूर्णचन्द्रस्य मण्डलम्। पद्ममध्ये वीजकोषे स्मरेच्चिन्तामणेः पुरीम्। तन्मध्ये नवकोणञ्च यन्त्रं परमदुर्लभम्। शम्भुवीजं हि तन्मध्ये साकारं हंसरूपकम्। हंसः परब्रह्मरूपः साकारः शिवरूपकः। तारचञ्चुर्वरारोहे निर्गमागमपक्षवान्। शिवशक्तिपदद्वन्द्वं विन्दुत्रयविलोचनः। विहारश्चास्य हंसस्य हेमपङ्कजपूजिते। एवं हंसोमणिद्वीपे तस्य क्रोड़े परः शिवः। वामे तस्य सिद्धकाली सदानन्दस्वरूपिणी। तस्याः प्रसादमासाद्य सर्वकर्त्ता महेश्वरः। तपोलोक इदं भद्रे! सर्व्वलोकस्य दुर्लभम्। यत्र ब्रह्मादयो देवा ध्यानयोगं सदाभ्यसेत्। मनसापि न लभ्येत योगेन तपसा न च। तपोलोकं गोलोकस्य चतुर्लक्षगुणं शिवे!। ब्रह्मलोकेषु ये देवा वैकुण्ठे ये सुरादयः। शम्भुलोके वसेद्योहि तेजोभक्तिपरायणः। तपसापि न लभ्येत तपोलोकगतिं शिवे। तपोलोकसमोनास्ति लोकमध्ये सुलोचने!। सालोक्यं हि महोलोके सारूप्यं जनलोकके। सायुज्यं च तपोलोके निर्व्वाणं हि तदूर्द्ध्वके। ततो ब्रह्मादयो देवास्तपोलोकार्थिनः सदा। इति ते कथितं कान्ते! चक्रषट्कस्य लक्षणम्। यज्ज्ञानादमरश्चैव जीवन्मुक्तश्च साधकः। यज्ज्ञात्वा जननीगर्भं न विशेत्तु कदाचन”।

**आज्ञात** त्रि० आ+ज्ञा–क्त सम्यग्ज्ञाते “आज्ञातं यदनाज्ञातं यज्ञस्य क्रियते मिथः” यजु० शिवसङ्कल्पः।

**आज्ञातीर्थ** न० ६त०। तन्त्रे मानसस्नानाङ्गं ध्येयतयोक्ते आज्ञाचक्राख्ये तीर्थे। “आज्ञाचक्रे सदा ध्यात्वा स्नाति निर्व्वाणसिद्धये”। रुद्रयामलम्।

**आज्ञान** न० आ+ज्ञा–ल्युट्। आज्ञाकरणे मानसवृत्तिभेदे। मानसवृत्तयश्च यथा। “संज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिर्मतिर्मनीषा जूतिः स्मृतिः संकल्पः क्रतुरसुः कामोवशः इति सर्व्वाण्येवैतानि प्रज्ञानस्य नामधेयानि” ऐ०उ०। “तदन्तःकरणोपाधिकस्योपलब्धुः प्रज्ञानरूपस्य ब्रह्मण उपलब्ध्यर्था अन्तःकरणवृत्तयो बाह्यान्तर्वर्त्तिविषयविषयास्ता इमा इत्युच्यन्ते। संज्ञानं संज्ञप्तिश्चेतनभावः। आज्ञानम् आज्ञप्तिरीश्वरभावः। विज्ञानं कलादिपरिज्ञानम्। प्रज्ञानं प्रज्ञप्तिः प्रज्ञता। मेधा ग्रन्थधारणे सामर्थ्यम्। दृष्टिरिन्द्रियद्वारा सर्वविषयोपलब्धिः। धृतिर्धारणमवसन्नानां शरीरेन्द्रियाणां ययोत्तम्भनं भवति। धृत्या शरीरमुद्वहन्तीति हि वदन्ति। मतिर्मननम्। मनीषा तत्र स्वातन्त्र्यम्। जूतिश्चेतसोरुजादिदुःखिभावः। स्मृतिः स्मरणम्। संकल्पः शुक्लकृष्णादिभावेन संकल्पनम् रूपादीनाम्। क्रतुरध्यवसायः। असुः प्राणनादिजीवनक्रियानिमित्ता वृत्तिः। कामोऽसन्निहितविषयाकाङ्क्षा। वशः स्त्रीव्यतिकराद्यभिलाष इत्येवमाद्याः अन्तःकरणवृत्तयः” शङ्करभाष्यम्।

**आज्ञानुग** त्रि० आज्ञामनुगच्छति अनु+गम–ड ६त०। आदेशानुसारेण गन्तरि दासादौ क्त आज्ञानुगतोऽप्यत्र त्रि०।

**आज्ञानुगामिन्** त्रि० आज्ञामनुगच्छति अनु+गम–णिनि ६त० स०। आज्ञानुगते स्त्रियां ङीप्।

**आज्ञानुयायिन्** त्रि० आज्ञामनुयाति अनु+या–णिनि ६त०स स्त्रियां ङीप्। आज्ञानुसारेण गन्तरि दासादौ।

**आज्ञानुवर्त्तिन्** त्रि० आज्ञामनुवर्त्तते अनु+वृत–णिनि ६त० स्त्रियां ङीप्। आज्ञानुसारेण वर्त्तमाने दासादौ।

**आज्ञानुसारिन्** त्रि० आज्ञामनुसरति अनु+सृ–णिनि ६त० स्त्रियां ङीप्। आज्ञानुसारेण कर्म्मकारके दासादौ

**आज्ञापक** त्रि० आज्ञापयति आदिशति आ+ज्ञा–णिच् ण्वुल्। आज्ञाकारके स्वामिप्रभृतौ। [पत्रे(हुकुमनामा)

**आज्ञापत्र** न० आज्ञाज्ञापकं पत्रम् शाक०त०। आदेशज्ञापके

**आज्ञाभङ्ग** पु० आज्ञाया आदेशस्य भङ्गः स्वविषयेषु प्रचाराभावः। आदेशस्याकरणेन आदिष्टविषयेषु प्रचाराभावे (हुकुम ना माना)। “दंष्ट्राभङ्गं मृगाणामधिपतय इव व्यक्तमानावलेपान्नाज्ञाभङ्गं सहन्ते नरप! नृपतयस्त्वादृशाः सार्व्वभौमाः” इति “चन्द्रगुप्तस्य चेतसः पीड़ामुपचिन्वता चाणक्येन क्रियमाणे चाज्ञाभङ्गे त्वयोपश्लोकैरुपश्लोक-